
# भाषासूत्रम् – १


## क्रियापदानि–१


### लट्लकारः (वर्तमानकालः) परस्मैपदम्

एकवचनम् | द्विवचनम् | बहुवचनम्


**प्रथमपुरुषः**

१

सः

२

तौ

३

ते

**मध्यमपुरुषः**

४

त्वम्

५

युवाम्

६

यूयम्

**उत्तमपुरुषः**

७

अहम्

८

आवाम्

९

वयम्

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | खादति १ | खादतः २ | खादन्ति ३ |
| मध्यमपुरुषः | खादसि ४ | खादथः ५ | खादथ ६ |
| उत्तमपुरुषः | खादामि ७ | खादावः ८ | खादामः ९ |

**पञ्चदश वाक्यानि। (परस्मैपदम्) कण्ठस्थीकरणार्थम्।**

१ सः बालकः खादति। २ तौ बालकौ खादतः। ३ ते बालकाः खादन्ति।
१ सा कन्या खादति। २ ते कन्ये खादतः। ३ ताः कन्याः खादन्ति।
१ तद् अपत्यं खादति। २ ते अपत्ये खादतः। ३ तानि अपत्यानि खादन्ति।
४. त्वं खादसि। ५. युवां खादथः। ६. यूयं खादथ।
७. अहं खादामि। ८. आवां खादावः। ९. वयं खादामः।

एतेषु वाक्येषु 'खादति' इति स्थाने पठति, धावति, हसति, खेलति, गच्छति, आगच्छति, उपविशति, उत्तिष्ठति एतेषाम् उपयोगं कृत्वा पुनः वदत स्मरत च।

क्रियापदस्य मूलं = धातुः ।
धातूनां दश विभागाः = गणाः ।
गणसूचकम् चिह्नम् = गणविकरणम् ।

**धातूनां प्रकारद्वयम्**

परस्मैपदिनः । आत्मनेपदिनः ।

कालानुसारं पदानुसारं च प्रत्ययाः भवन्ति ।

**लट्लकारः (वर्तमानकालः)**

**परस्मैपदप्रत्ययाः**

| | **ए.व.** | **द्विव.** | **ब. व.** |
|---|---|---|---|
| **प्र. पु.** | ति [१] | तः [२] | अन्ति [३] |
| **म.पु.** | सि [४] | थः [५] | थ [६] |
| **उ.पु.** | मि [७] | वः [८] | मः [९] |

**क्रियापदसूत्रम् –** **(मूलधातुः + गणविकरणम्) = धात्वङ्गम् + प्रत्ययः = क्रियापदम्**
**(आदेशः) (चिह्नम्)**

| गणः | विकरणम् | उदाहरणम् |
|---|---|---|
| प्रथमः | अ | पठति |
| चतुर्थः | य | नृत्यति |
| षष्ठः | अ | लिखति |
| दशमः | अय | पूजयति |

**पठति = पठ् + अ + ति**

**पठ् ↓ मूलधातुः, अ ↓ गणविकरणम्, ति ↓ प्रत्ययः**

**पठ् (१ प. प.) = पठ् + अ = पठ + ति = पठति**

**नृत् (४ प. प.) = नृत् + य = नृत्य + ति = नृत्यति**

**लिख् (६ प. प) = लिख् + अ = लिख + ति = लिखति**

**पूज् (१० प. प) = पूज् + अय = पूजय + ति = पूजयति**

**आदेशः** (एकस्य स्थाने अपरस्य आगमनं नाम आदेशः ।)

**आदेशरहितः धातुसमूहः –** नम्-नमति, क्रुध्-क्रुध्यति, लिख्-लिखति, पूज्-पूजयति

**आदेशसहितः धातुसमूहः – गम्-गच्छ् (१ प. प.) = गच्छ् + अ = गच्छ + ति = गच्छति**

स्था [तिष्ठ्] – (**१ प. प.**) = तिष्ठति, पा [पिब्] –(**१ प.प.**) = पिबति

प्रच्छ् [पृच्छ्] – (**६ प. प.**) = पृच्छति, दा [यच्छ्] – (**१ प. प.**) = यच्छति

## लट्रूपाणि

### पठ् १ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | पठति | पठतः | पठन्ति |
| म. पु. | पठसि | पठथः | पठथ |
| उ.पु. | पठामि | पठावः | पठामः |

### नृत् ४ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | नृत्यति | नृत्यतः | नृत्यन्ति |
| म. पु. | नृत्यसि | नृत्यथः | नृत्यथ |
| उ. पु. | नृत्यामि | नृत्यावः | नृत्यामः |

### लिख् ६ प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | लिखति | लिखतः | लिखन्ति |
| म. पु. | लिखसि | लिखथः | लिखथ |
| उ.पु. | लिखामि | लिखावः | लिखामः |

### पूज् १० प. प.

| | ए. व. | द्विव. | ब. व. |
|---|---|---|---|
| प्र. पु. | पूजयति | पूजयतः | पूजयन्ति |
| म. पु. | पूजयसि | पूजयथः | पूजयथ |
| उ. पु. | पूजयामि | पूजयावः | पूजयामः |

### क्रीडा –

१. **क्रियापदसङ्ग्रहः**:– प्रत्येकं छात्रः एकैकं क्रियापदं वदति । एकेन उक्तं क्रियापदम् अन्येन न वक्तव्यम् ।

२. **आशु–अभिनयः**:– एकः छात्रः अभिनयेन क्रियां दर्शयति। अन्ये छात्राः क्रियापदम् अभिजानन्ति वदन्ति च।

३. **क्रियापदशृङ्खला** – एकः छात्रः एकं क्रियापदं वदति । द्वितीयः छात्रः पूर्वोक्तक्रियापदेन सह नूतनं क्रियापदं वदति । तृतीयः छात्रः अनुक्रमेण पूर्वोक्त–क्रियापद–द्वयेन सह नूतनं क्रियापदं वदति । एवं प्रत्येकं छात्रः पूर्वोक्त–क्रियापदैः सह नूतनं क्रियापदं वदति । एवं क्रियापदानां शृङ्खला भवेत् ।

४. **अविलम्बं दशक्रियापदानि वदत ।**

५. **निरन्तरं पञ्चदशवाक्यानि वदत ।**

**वर्गपरीक्षाप्रारूपम् । गुणाः – २०**

**अभ्यासक्रमः**:– स्वपरिचयः, लिङ्गज्ञानम्, पुरुषज्ञानम्, वचनज्ञानम्, लट्रूपाणि ।

**प्रारूपम्** –
१) चित्राणां नामानि लिखत । (चित्रपदकोषतः) ४
२) वचनम् अनुसृत्य चित्रनामानि लिखत । ४
३) स्तम्भमेलनं कुरुत । (कर्तृपदं–क्रियापदम्) ४
४) सङ्ख्याः लिखत । (अक्षरैः/अङ्कैः) १
५) शब्दान् पृथक् कुरुत । (लिङ्गानुसारम्) (केवलं षट्) ३
६) मञ्जूषातः योग्यं पर्यायं चित्वा वाक्यानि पूरयत । (किमपि एकम्) २
७) क्रियापदकोष्टकं पूरयत । (लट्रूपाणि) २